Shivashtakam

शिवाष्टकम्

NityaPaath
nityapaath.com/shivashtakam/

SHLOKA · श्लोक

1 प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानंदभाजाम्।
भवद्भव्यभूतेश्वरं भूतनाथं शिवं शंकरं शंभुमीशानमीडे॥

2 गले रुंडमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम्।
जटाजूटभंगोत्तरंगैर्विशालं शिवं शंकरं शंभुमीशानमीडे॥

3 मुदामाकरं मंडनं मंडयंतं महामंडलं भस्मभूषाधरं तम्।
अनादिं ह्यपारं महामोहमारं शिवं शंकरं शंभुमीशानमीडे॥

4 तटाधोनिवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम्।
गिरीशं गणेशं सुरेशं महेशं शिवं शंकरं शंभुमीशानमीडे॥

5 गिरीन्द्रात्मजासंगृहीतार्धदेहं गिरौ संस्थितं सर्वदासन्नगेहम्।
परब्रह्म ब्रह्मादिभिर्वंद्यमानं शिवं शंकरं शंभुमीशानमीडे॥

6 कपालं त्रिशूलं कराभ्यां दधानं पदांभोजनम्राय कामं ददानम्।
बलीवर्दयानं सुराणां प्रधानं शिवं शंकरं शंभुमीशानमीडे॥

7 शरच्चंद्रगात्रं गुणानंदपात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम्।
अपर्णाकलत्रं चरित्रं विचित्रं शिवं शंकरं शंभुमीशानमीडे॥

8 हरं सर्पहारं चिताभूविहारं भवं वेदसारं सदा निर्विकारम्।
श्मशाने वसंतं मनोजं दहंतं शिवं शंकरं शंभुमीशानमीडे॥

PHALASHRUTI · फलश्रुति

9 स्तवं यः प्रभाते नरः शूलपाणेः पठेत्सर्वदा भर्गभावानुरक्तः।
स पुत्रं धनं धान्यमित्रं कलत्रं विचित्रः समासाद्य मोक्षं प्रयाति॥

Text checked against: Brihat Stotra Ratnakara, Nirnaya Sagar Press, Mumbai, 1912. Meanings, audio and all scripts at nityapaath.com/shivashtakam/